# Panchagangashtakam

# पञ्चगङ्गाष्टकम्

## Document Information

Text title : Panchagangashtakam

File name : panchagangAShTakam.itx

Category : devii, devI, nadI, aShTaka

Location : doc_devii

Transliterated by : Anil Kumar Pandey anil.kumar17pandey at gmail.com

Proofread by : Anil Kumar Pandey anil.kumar17pandey at gmail.com

Description/comments : Ganga Jnana Mahodadhi compiled by Acharya Ramapada Chakravarty

Latest update : June 13, 2010

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

June 13, 2020

*sanskritdocuments.org*

Panchagangashtakam

# पञ्चगङ्गाष्टकम्

श्रीगणेशाय नमः ।

गङ्गा शिवा हि यमुनाऽपि च पुण्यतोया
    वाणी पवित्रकिरणा वरधूतपापा ।
श्रीबिन्दुमाधवहरेः पुरतो विचित्रा
    काश्यां सदा विजयते वरपञ्चगङ्गा ॥ १॥

प्रातः सदा मुनिगणाः सकलाश्च देवाः
    स्नानाय१ माधवपुरःसरमापतन्ति । (१. स्नानार्थ पाठान्तर)
यस्यां स्थिरो भवति माधव आदिदेवः
    सेयं सदा विजयते वरपञ्चगङ्गा ॥ २॥

यस्यां सदा हरिहरौ वसतः२ प्रसन्नौ (२. रमतः पाठान्तर)
    धर्मद्रवां जनहितां कवयो गृणन्ति ।
ध्यायन्ति यां शुभकरीं कलिकल्मषघ्नीं
    सेयं सदा विजयते वरपञ्चगङ्गा ॥ ३॥

संप्राप्य ते सुकृतिनः शिवराजधानीं
    काशीं  भजन्ति मुदिता वरपञ्चगङ्गाम् ।
ते दुस्तरां गुणमयीं प्रतरन्ति मायां
    लोकं पुनन्ति सकलं शिवभक्तियुक्ताः ॥ ४॥

गर्जन्ति पापकरिणो भयदा हि तावद्
    यावज्जनो न भजते वरपञ्चगङ्गाम् ।
यां गच्छतः प्रतिपदं भवति प्रपुण्यं
    तां त्वां नमामि सततं हृदि पञ्चगङ्गे ! ॥ ५॥

त्यक्ता अपि प्रियजनैरतिपापयुक्ता
    रोगादिभिः परिवृता अतिदुःखयुक्ताः ।
दैवाद्यदि त्वयि पतन्त्यथ पञ्चगङ्गे !

तेनैव ते सुकृतिनः परमं व्रजन्ति ॥ ६॥

त्वन्नाम दुर्लभमिदं तव दर्शनञ्च
त्वं कान्तिके त्वतितरां जनदुर्लभाऽसि ।
त्वय्येव भक्तिममलां वरदे ! प्रदेहि
काश्यां शिवे! हरिपदे सुजने श्रुतौ च ॥ ७॥

स्तोतुं न कोऽप्यलमनन्तगुणे ! तथापि
सद्भिः प्रवर्तित इति प्रवदामि किञ्चित् ।
तन्मे क्षमस्व शिशुभावनया सति ! त्वं
प्रातः प्रसीद सुभगे ! मयि पञ्चगङ्गे ! ॥ ८॥

गङ्गाष्टकमिदं पुण्यं भुक्तिमुक्तिप्रदं नृणाम् ।
सत्यज्ञानानदे तीर्थे यतिना रचितं मुदे ॥ ९॥

इदं स्तोत्रं तु रचितं तैलङ्गशास्त्रिशर्मणा ।
लिखितं दुण्ढिराजेन स्तोत्रं सम्पूर्णमुच्यते ॥ १०॥

इदं स्तोत्रं पठेन्नित्यं यः स्मरेत्पुण्यवान्नरः ।
तस्य मुक्तिस्तु जायेत अत्रांशे नास्ति संशयः ॥ ११॥

लिखितं दुण्ढिराजेन कालोपाख्येन धीमता ।
देवीदाशर्मणा सार्धं पुस्तकं दत्तमेव च ॥ १२॥

स्तोत्र-टिप्पणी- अष्टकमिदं पाण्डुलिपिरूपेण रामापुर-वाराणसीस्थाद् आचार्यब्रह्मगोपालभादुड़ीमहाशयस्य पुस्तकालयादस्माभिः सङ्गृहीतम् । स्तोत्रस्य दशमश्लोके तैलङ्गशास्त्रिशर्मा अस्य रचयितेत्युक्तम् । पुष्पिकायामस्य रचनाकालः संवत् १७८८ इत्युल्लिखितम् । अतः खीष्टाब्दस्य १७३१ तमे वर्षे लिखितमेतत् केनचित् ढुण्ढिराजेन इति प्रतीयते । एष एव तैलङ्गशास्त्रिशर्मा सुप्रसिद्धो योगी तैलङ्गास्वामीति विज्ञायते । श्लोकेषु काश्चनाशुद्धयोऽस्माभिर्लक्षिताः । स्वबुद्ध्या ताः संशोध्य शुद्धपाठः मूलपाठे निवेशितः । हस्तलेखस्याशुद्धपाठाः तत्तत्स्थाने सङ्ख्याक्रमेण स्तोत्रस्याधस्तादुल्लिखिताः ॥

काश्यां तैलङ्गस्वामी पञ्चगङ्गाघटटे सन्यासिनामाश्रमे मृत्युपर्यन्तं १८८७ खीष्टाब्दं यावत् दिगम्बरावस्थायां न्यवसत् । श्रूयते तथाऽनुमीयते यत् तैलङ्गस्वामिनो मुखादबाधगत्या

निःसृतं पञ्चगङ्गाष्टकमिदं प्रत्यहं तदीयप्रमुखभक्तो
देवीदानामकः श्रुतवान् । देवीदामहोदयस्य स्वेच्छया प्रार्थनया
च दुण्डिराजेनाष्टकमिदं लिपिबद्धमकारि । आरम्भेऽष्टौ श्लोका
वसन्ततिलकाच्छन्दःसु तैलङ्गस्वामिना रचिताः, अन्ते चत्वारः
श्लोकाश्चानुष्टुप्छन्दःसु लेखकेन विरचिताः संयोजिताश्चेत्यनुमीयते ।

इति पञ्चगगङ्गाहकं सम्पूर्णम् ।

Encoded and proofread by Anil Kumar Pandey anil.kumar17pandey at gmail.com

---

*Panchagangashtakam*

pdf was typeset on June 13, 2020

Please send corrections to *sanskrit@cheerful.com*